तत्तदुपभोगं साक्षात्परम्परया जनयत्येव नहि भोगप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति तेन द्व्यणुकादिब्रह्माण्डान्तं सर्व्वमेव विषयो भवतीत्यर्थः । इति सिद्धान्तमुक्तावली ॥ * ॥ नित्यसेवितः । इति भरतधृताजयः ॥ आसक्तः । शुक्रः । इत्यप्यजयपालः ॥ जनपदः । इति मेदिनी ॥ कान्तादिः । इति शब्दरत्नावली ॥ नियामकः । यथा,—

"विशब्दो हि विशेषार्थः सिनोतेर्बन्ध उच्यते ।
विशेषेण सिनोतीति विषयोऽतो नियामकः ॥"

इति भट्टकारिका ॥ * ॥

आरोपाश्रयः । यथा,—

"आरोपाख्या तु यत्रोक्तौ विषयी विषयस्तथा ।
विषय्यन्तःकृतेऽन्यस्मिन् सा स्यात् साध्यवसा-
निका ॥"

यथा, गौर्व्वाहीकः । इति काव्यप्रकाशे २ उल्लासः ॥ ("भोगसाधनं विषयः ।" इति तर्ककौमुदी ॥)

विषयाज्ञानं, क्ली, ( विषयस्याज्ञानं यस्याम् । ) तन्द्रा । इति राजनिर्घण्टः ॥

विषयायी, [न्] पुं, ( विषयान् अयते प्राप्नोतीति । अय गतौ + णिनिः ।) राजा । वैषयिकजनः । इन्द्रियः । कामदेवः । विषयासक्तपुरुषः । इति मेदिनी । ने, २४६ ॥

विषयि, [न्] क्ली, ( विषयाः सन्त्यस्येति । विषय + इनिः ।) इन्द्रियम् । इति मेदिनी । ने, २११॥

विषयी, [न्] त्रि, ( विषयोऽस्यस्येति । इनिः । ) विषयासक्तः । इति मेदिनी । ने, २११ ॥

विषयी, [न्] पुं, ( विषयोऽस्यास्तीति । इनिः ।) नृपतिः । कामदेवः । वैषयिकः । इति मेदिनी । ने, २११ ॥ ध्वनिः । इत्यजयपालः ॥ आरोप्यमाणः । यथा,—

"विषय्यन्तःकृतेऽन्यस्मिन् सा स्यात् साध्यवसा-
निका ॥"

विषयिणा आरोप्यमाणेन अन्तःकृते निगीर्णेऽन्यस्मिन् आरोपविषये सति सा स्यात् साध्यवसानिका । इति काव्यप्रकाशः ॥

विषरूपा, स्त्री, अतिविषा । इति राजनिर्घण्टः ॥

विषलं, क्ली, विषम् । इति शब्दचन्द्रिका ॥

विषलता, स्त्री, ( विषस्य लता । ) इन्द्रवारुणी । इति राजनिर्घण्टः ॥ (विषप्रधानलतामात्रे । यथा, गीतायां श्रीधरः । २ । ४२ । "विषलतावदापाततो रमणीयाम् ।")

विषविद्या, स्त्री, विषघ्नमन्त्रः । इति विषवैद्यशब्दटीकायां भरतः ।

विषवैद्यः, पुं, ( विषस्य वैद्यः । ) विषघ्नमन्त्रवेत्ता । ओझा इति ख्यातः । यथा । विषविद्यां वेत्ति अधीते वा विषवैद्यः अनुशतिकादित्वादन्त्यपदवृद्धिः । विषस्य वैद्यश्चिकित्सकः इति वा । इति भरतः ॥ तत्पर्य्यायः । जाङ्गुलिकः २ । इत्यमरः ॥ जाङ्गलिकः ३ नरेन्द्रः ४ कौशिकः ५ कथाप्रसङ्गः ६ चक्राटः ७ । इति जटाधरः ॥ व्यालग्राही ८ जाङ्गुलिः ९ जाङ्गलिः १० अहितुण्डिकः ११ व्यालग्राहः १२ गारुड़िकः १३ । इति शब्दरत्नावली ॥

विषवैरिणी, स्त्री, ( विषस्य वैरिणी । ) निर्व्विषा । इति राजनिर्घण्टः ॥

विषशालूकः, पुं, ( विषस्य शालूकः । ) पद्मकन्दः । अस्य गुणाः । गुरुत्वम् । विष्टम्भित्वम् । शीतलत्वञ्च । इति राजवल्लभः ॥

विषशूकः, पुं, (विषं शूके यस्य ।) भृङ्गरोलः । इति भूरिप्रयोगः ॥

विषशृङ्गी, [न्] पुं, (विषं विषयुक्तं शृङ्गं तदस्यास्तीति । विषशृङ्ग + इनिः ।) भृङ्गरोलः । इति हारावली ॥

विषसूचकः, पुं, ( विषं सूचयति विषयुक्तान्नादिदर्शने स्वतः स्वन् ज्ञापयतीति । सूच् + णिच् + ण्वुल् । ) चकोरपक्षी । इति हेमचन्द्रः ॥

विषसृक्का, [न्] पुं, ( विषं सृक्कणि यस्य । ) भृङ्गरोलः । इति त्रिकाण्डशेषः ॥

विषहन्त्री, स्त्री, ( विष + हन + तृच् । स्त्रियां ङीप् । ) अपराजिता । निर्व्विषा । इति राजनिर्घण्टः ॥

विषहरः, त्रि, ( हरतीति । हृ + अच् । विषस्य हरः । ) गरलनाशकौषधादिः । यथा । ॐ शूँ चः ।

"मन्त्रोऽयं हरते रुद्र सर्व्ववृश्चिकजं विषम् ।
पिप्पली नवनीतञ्च शृङ्गवेरञ्च सैन्धवम् ।
मरीचं दधि कुष्ठञ्च नस्ये पाने विषं हरेत् ॥
त्रिफला टङ्कुष्ठञ्च चन्दनं घृतसंयुतम् ।
एतत्पानाच्च लेपाच्च विषनाशो भवेच्छिव ॥
पारावतस्य चाषोऽपि हरितालं मनःशिला ।
एष योगो विषं हन्ति वैनतेय इवोरगान् ॥
सैन्धवं लुषयं चूर्णं दधिमध्वाज्यसंयुतम् ।
वृश्चिकस्य विषं हन्ति लेपोऽयं वृषभध्वज ॥"

इति गारुड़े १८६ अध्यायः ॥

विषहरा, स्त्री, मनसादेवी । इति शब्दरत्नावली ॥ ( यथा, देवीभागवते । ९ । ४७ । ५२ ।

"जरत्कारुप्रियास्तीकमाता विषहरेति च ॥")

विषहरी, स्त्री, मनसादेवी । इति शब्दरत्नावली ॥ ( यथा, देवीभागवते । ९ । ४७ । ४७ ।

"विषं संहर्त्तुमीशा या तस्माद्विषहरी स्मृता ॥")

विषहा, स्त्री, ( विषह + टाप् । ) देवदालीलता । निर्व्विषा । इति राजनिर्घण्टः ॥

विषा, स्त्री, अतिविषा । इत्यमरः ॥ बुद्धिः । इत्युणादिकोषः ॥ (अस्याः पर्य्यायो गुणाश्च यथा,

"काश्मीरातिविषा श्वेता श्यामा शुक्ला विषा-
रुणा ।"

इति वैद्यकरत्नमालायाम् ॥

"विषात्वतिविषा विश्वा शृङ्गी प्रतिविषारुणा ।
शुक्लकन्दा चोपविषा भङ्गुराघुणवल्लभा ॥
विषा सोष्णा कटुस्तिक्ता पाचनी दीपनी हरेत् ।
कफपित्तातिसारामविषकासवमिक्रिमीन् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

विषाङ्कुरः, पुं, ( विषस्याङ्कुरः । ) शल्यास्त्रम् । इति त्रिकाण्डशेषः ॥

विषाणं, क्ली, कुष्ठौषधम् । पशुशृङ्गम् । ( यथा, साहित्यदर्पणे । १० ।

"त्यजसि शुकं दृषदंशकवदने
मृगमर्पयसि मृगादनरदने ।
वितरसि तुरगं महिषविषाणे
विदधच्चेतो भोगविताने ॥")

हस्तिदन्तः । इति मेदिनी । णे, ७७ ॥ ( यथा, शिशुपालवधे । १ । ६० ।

"न जातु वैनायकमेकमुद्धृतं
विषाणमद्यापि पुनः प्ररोहति ॥")

कोलदन्तः । इति हेमचन्द्रः ॥ ( विशेषेण मदद्रातरि, त्रि । यथा, ऋग्वेदे । ५ । ४४ । ११ ।

"विषाणं परिपानमन्ति ते ।"

"विषाणं विशेषेण मदस्य दातारम् ।" इति तद्भाष्ये सायणः ॥)

विषाणिका, स्त्री, मेषशृङ्गी । इति रत्नमाला ॥ ( अस्याः पर्य्यायो यथा,—

"शृङ्गी कर्कटशृङ्गी स्यात् कुलीरश्च विषाणिका ।
अजशृङ्गी च रक्ता च कर्कटाख्या च कीर्त्तिता ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) सातला । कर्कटशृङ्गी । आवर्त्तकी । इति राजनिर्घण्टः ॥

विषाणी, स्त्री, क्षीरकाकोली । अजशृङ्गी । इति मेदिनी । णे, ७७ ॥ वृश्चिकाली । इति राजनिर्घण्टः ॥ तिन्तिड़ी । इति शब्दचन्द्रिका ॥

विषाणी, [न्] पुं, (विषाणमस्यास्तीति । विषाण + इनिः । ) हस्ती । शृङ्गी । इत्यजयः ॥ ( यथा, हरिवंशे । २०४ । २२ ।

"खड्गा विषाणिनश्चैव वृषभाश्च मृगास्तथा ॥")

ऋषभनामौषधम् । शृङ्गाटकः । इति राजनिर्घण्टः ॥

विषादः, पुं, ( वि + षद + घञ् । ) अवसादः । यथा,—

"जाड्यं मौर्ख्यं विषादोऽवसादः सादो विष-
सवा ।"

इति हेमचन्द्रः ॥

( यथा, भागवते । १ । ११ । १ ।

"दध्मौ दरवरं तेषां विषादं शमयन्निव ॥")

विषादनी, स्त्री, पलाशीलता । इति राजनिर्घण्टः ॥

विषाननः, पुं, ( विषमानने यस्य । ) सर्पः । इति शब्दमाला ॥

विषान्तकः, पुं, (विषस्य अन्तकः नाशकः । पीतविषत्वात् । ) शिवः । इति हेमचन्द्रः ॥ विषनाशके, त्रि ॥

विषापहः, पुं, ( विषं अपहन्तीति । हन + डः । ) मुष्ककवृक्षः । इति राजनिर्घण्टः ॥ ( विषनाशके, त्रि । यथा, मनौ । ७ । २१७ ।

"सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषापहैः ॥")

विषापहा, स्त्री, इन्द्रवारुणी । निर्व्विषा । इति राजनिर्घण्टः ॥ नागदमनी । इति भावप्रकाशः ॥